# !! श्री चण्डी कवचम् ( महिलाओं के लिए ) !!

श्री चण्डीकवचस्य, ब्रह्मा ऋषिः। अनुष्टुप् छन्दः। चामुण्डा देवता। अङ्गन्यासोक्तमातरो बीजम्।
दिग्बन्ध देवतास्तत्त्वम्। श्री जगदम्बा प्रीत्यर्थे मम सपरिवारस्य रक्षणार्थे च पाठे विनियोगः॥

नमस्तेऽस्तु महारौद्रे महाघोरपराक्रमे।
महाबले महोत्साहे महाभयविनाशिनि॥ १६॥

त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि।
प्राच्यां रक्षतु माम् ऐन्द्री आग्नेय्याम् अग्निदेवता॥ १७॥

दक्षिणेऽवतु वाराही नैऋत्यां खड्गधारिणी।
प्रतीच्यां वारुणी रक्षेत् वायव्यां मृगवाहिनी॥ १८॥

उदीच्यां पातु कौमारी ऐशान्यां शूलधारिणी।
ऊर्ध्वं ब्रह्माणि मे रक्षेत् अधस्ताद् वैष्णवी तथा॥ १९॥

एवं दश दिशो रक्षेत् चामुण्डा शववाहना।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः॥ २०॥

अजिता वामपार्श्वे तु दक्षिणे चापराजिता।
शिखाम् उद्योतिनी रक्षेत् उमा मूर्ध्नि व्यवस्थिता॥ २१॥

मालाधरी ललाटे च भ्रुवौ रक्षेद् यशस्विनी।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके॥ २२॥

शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी।
कपोलौ कालिका रक्षेत् कर्णमूले तु शाङ्करी॥ २३॥

नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका।
अधरे चामृतकला जिह्वायां च सरस्वती॥ २४॥

दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका।
घण्टिकां चित्रघण्टा च महामाया च तालुके॥ २५॥

कामाक्षी चिबुकं रक्षेद् वाचं मे सर्वमङ्गला।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी॥ २६॥

नीलग्रीवा बहिःकण्ठे नलिकां नलकूबरी।
स्कन्धयोः खड्गिनी रक्षेद् बाहू मे वज्रधारिणी॥ २७॥

हस्तयोर्दण्डिनी रक्षेत् अम्बिका चाङ्गुलीषु च।
नखान् शूलेश्वरी रक्षेत् कुक्षौ रक्षेत्कुलेश्वरी॥ २८॥

स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी।
हृदये ललिता देवी उदरे शूलधारिणी॥ २९॥

नाभौ च कामिनी रक्षेत् गुह्यं गुह्येश्वरी तथा।
पूतना कामिका योनी गुदे महिषवाहिनी॥ ३०॥

कट्यां भगवती रक्षेत् जानुनी विन्ध्यवासिनी।
जङ्घे महाबला रक्षेत् सर्वकामप्रदायिनी॥ ३१॥

गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी।
पादाङ्गुलीषु श्री रक्षेत् पादाधस्तलवासिनी॥ ३२॥

नखान् दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी।

**रोमकूपेषु कौबेरी त्वचं वागीश्वरी तथा ॥ ३३॥**

**रक्तमज्जावसामांसान् अस्थिमेदांसि पार्वती ।**
**अन्त्राणि कालरात्रिश्च पित्तं च मुकुटेश्वरी ॥ ३४॥**

**पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।**
**ज्वालामुखी नखज्वाला अभेद्या सर्वसन्धिषु ॥ ३५॥**

**रजं ब्रह्माणि मे रक्षेत्  छायां छत्रेश्वरी तथा ।**
**अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ॥ ३६॥**

**प्राणापानौ तथा व्यानमुदानं च समानकम् ।**
**वज्रहस्ता च मे रक्षेत् प्राणं कल्याणशोभना ॥ ३७॥**

**रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।**
**सत्त्वं रजस्तमश्चैव रक्षेन् नारायणी सदा ॥ ३८॥**

**आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।**
**यशः कीर्तिं च लक्ष्मीं च धनं विद्यां च चक्रिणी ॥ ३९॥**

**गोत्रमिन्द्राणि मे रक्षेत् पशून्मे रक्ष चण्डिके ।**
**पुत्रान् रक्षेन्महालक्ष्मी पतिं रक्षतु भैरवी ॥ ४०॥**
**( यदि कन्या पाठ करें तो पुत्र और पति के स्थान पर 'माता और पिता' का नाम लिखें !**
**जैसे "मातुः रक्षेन्महालक्ष्मी पितुः रक्षतु भैरवी" ॥ ४०॥ )**

**पन्थानं सुपथा रक्षेत् मार्गं क्षेमकरी तथा ।**
**राजद्वारे महालक्ष्मी विजया सर्वतः स्थिता ॥ ४१॥**

**रक्षाहीनं तु यत्  स्थानं वर्जितं कवचेन तु ।**
**तत्सर्वं रक्ष मे देवि जयन्ती पापनाशिनी ॥ ४२॥**

---

सिध्दी विधान – इस कवच का पाठ सभी प्रकार की रक्षा हेतु किया जाता है ! इसे किसी भी सिद्ध मुहूर्त में ( विशेषकर नवरात्रि अथवा गुप्त नवरात्री ) में सिद्ध कर सकते है ! प्रतिदिन कम से कम 100 पाठ और अधिकतम 1000 पाठ करना है ! प्रतिदिन की पाठ संख्या समान हो, कम या अधिक नही ! यह पाठ ९ दिन तक अनुष्ठानपूर्वक करें !  अनुष्ठान के नियम पालन करें !

सिध्दी के उपरांत इस कवच का दिन में ३ बार ३ समय पाठ करना है !

---

अधिक जानकारी के लिए SWAMI RUPESHWARANAND चैनल देखें !

महिलाएं देवी कवच कैसे पढ़ें ? https://youtu.be/2UgeKSMLJZ0

---

- **स्वामी रुपेश्वरानंद**
  **https://swamirupeshwaranand.in/**